॥ श्रीकृष्णाय नमः ॥

॥ श्रीगोपीजनवल्लभाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

# नवरत्नम् ।

चिन्ता कापि न कार्या निवेदितात्मभिः कदापीति[1] ।
भगवानपि पुष्टिस्थो न करिष्यति लौकिकीं च गतिम् ॥१॥

निवेदनं तु स्मर्तव्यं सर्वथा तादृशैर्जनैः ।
सर्वेश्वरश्च सर्वात्मा निजेच्छातः करिष्यति ॥२॥

सर्वेषां प्रभुसम्बन्धो न प्रत्येकमिति स्थितिः ।
अतोऽन्यविनियोगेऽपि चिन्ता का स्वस्य सोऽपि चेत् ॥३॥

अज्ञानादथवा ज्ञानात् कृतमात्मनिवेदनम् ।
यैः कृष्णसात्कृतप्राणैस्तेषां का परिदेवना ॥४॥

तथा निवेदने चिन्ता त्याज्या श्रीपुरुषोत्तमे ।
विनियोगेऽपि सा त्याज्या समर्थो हि हरिः स्वतः ॥५॥

लोके स्वास्थ्यं तथा वेदे हरिस्तु न करिष्यति ।
पुष्टिमार्गस्थितो यस्मात् साक्षिणो भवताखिलाः ॥६॥

सेवाकृतिर्गुरोराज्ञा बाधनं[3] वा हरीच्छया ।
अतः सेवापरं चित्तं विधाय स्थीयतां सुखम् ॥७॥

चित्तोद्वेगं विधायापि हरिर्यद्यत्करिष्यति ।
तथैव तस्य लीलेति मत्वा चिन्तां द्रुतं त्यजेत् ॥८॥

तस्मात् सर्वात्मना नित्यं श्रीकृष्णः शरणं मम ।
वदद्भिरेवं[4] सततं स्थेयमित्येव मे मतिः ॥९॥

इति श्रीमद्वल्लभाचार्यचरणप्रकटितं नवरत्नं समाप्तम् ॥

---

१. 'इति' रहितोऽपि पाठः क्वचित्। २. 'च' इति श्रीमुरलीधरभट्टसंमतः पाठः। ३. 'अबाधनम्' इति वैकल्पिकच्छेदोऽपि। ४. 'एव' इत्यपि पाठः श्रीप्रभुचरणानामिष्टः। श्रीमुरलीधरभट्टानां तु 'एव' इत्येव।